संस्कृत-वार्ता:

13.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:-</u>

- लोकसभा-निवार्चनस्य चतुर्थचरणीयमतदानं सञ्जातम्। पञ्चवादनं यावत् द्विषष्टि: प्रतिशतं अधिकं मतदानं समंकितम्।
- लोकसभा-निर्वाचनस्य शेषेभ्य: त्रिभ्य: चरणेभ्य: प्रचाराभियानं शीर्षस्थानं भजते। प्रधानमन्त्री भाजपादलस्य वरिष्ठनेता च नरेन्द्रमोदी अद्य बिहार-राज्ये अनेकानि पथप्रदर्शनानि कृतवान्।
- सर्वोच्चन्यायालयेन अद्य झारखण्डस्य पूर्व-मुख्यमन्त्रिण: हेमन्तसोरेनस्य अल्पकालिक-मुक्ति-याचिका निरस्तीकृता।
- केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन सी.बी.एस.ई. इत्यनेनाद्य दश-द्वादश-कक्षयो: परिणामा: घोषिता। बालिका: सर्वोच्चप्रदर्शनानि कृतवत्य:।
- इण्डियनप्रीमियरलीग-इत्येतस्यां क्रिकेट-प्रतिस्पर्धायां समायोक्ष्यमाणे अद्यात्मके द्वन्द्वे अहमदाबादनगरस्य नरेन्द्रमोदी-क्रीडांगणे गुजरात-टाइटन्स-कोलकाता-नाइट-राइडर्स दले स्पर्धिष्येते।

- <u>लोकसभा-निवार्चनस्य चतुर्थचरण</u>

लोकसभा-निवार्चनस्य चतुर्थचरणीयमतदानं सञ्जातम्। एतस्मिन् चरणे मतदाने अद्य नवराज्येभ्य: एकस्मै केन्द्रशासितप्रदेशाय च षण्णवति आसनेभ्य: मतदानानि समनुष्ठितानि। पञ्चवादनं यावत् द्विषष्टि: प्रतिशतं मतदानं समंकितम्। प्राप्तसूचनासारि -
पश्चिमबंगालराज्य षड्सप्ततिप्रतिशतं
मध्यप्रदेश-आन्ध्रप्रदेशयो: अष्टषष्टि: प्रतिशतं
झारखण्डराज्ये त्रिषष्ट्यधिकं प्रतिशतं
ओडिसाराज्ये प्रायश: त्रिषष्टि प्रतिशतं
तेलंगानाराज्ये एकषष्टि: प्रतिशतं
उत्तरप्रदेशे षड्पञ्चाशदधिकं प्रतिशतं।
बिहारे चतु:पञ्चाशदधिकं प्रतिशतं
महाराष्ट्रे द्विपञ्चाशत् प्रतिशतं
केन्द्रशासिते जम्मू-कश्मीरे प्रायश: षड्त्रिंशत् प्रतिशतं मतदानं समंकितम्।

## लोकसभा-नैर्वाचनिकसभा

लोकसभा-निर्वाचनस्य शेषेभ्य: त्रिभ्य: चरणेभ्य: प्रचाराभियानं शीर्षस्थानं भजते। विभिन्नं-दलानां वरिष्ठनेतॄणाम् जनसभा: मार्गीय प्रदर्शनानि च भविष्यन्ति। प्रधानमन्त्री भाजपादलस्य वरिष्ठनेता च नरेन्द्रमोदी अद्य बिहार-राज्ये अनेकानि पथ प्रदर्शनानि कृतवान्। असौ अद्य प्रात: हाजीपुर, मुजफ्फरपुर क्षेत्रयो:जनसभा: संबोधितवान्। सायंकाले प्रधानमन्त्री श्रीमोदी उत्तरप्रदेशस्य वाराणसीनगरे एकं मार्गीयप्रदर्शनं विधास्यति। तदनन्तरं प्रधानमन्त्री श्व: वाराणसी लोकसभाक्षेत्राय स्वीय नामांकन पत्रं प्रपूरयिष्यति। कांग्रेस दलस्य वरिष्ठ नेता राहुलगांधी उत्तरप्रदेशस्य रायबरेली जनपदे एकां जनसभां सम्बोधितवान्। असौ आश्वासितवान् यत् कांग्रेस इंडी संयुतिदलं यदि प्रशासने आयास्यति तर्हि अस्य प्रथमं दायित्वं भविष्यति निर्धनकृषकाणां कर-मुक्ति-प्रदानं इति।

## सर्वोच्चन्यायालय:-हेमन्तसोरेन

सर्वोच्चन्यायालयेन अद्य प्रख्यात-भूमि-प्रवञ्चनाया: कथिते एकस्मिन् धनशोधन-प्रकरणे झारखण्डस्य पूर्व-मुख्यमन्त्रिण: हेमन्तसोरेनस्य अल्पकालिक-मुक्ति-याचिका निरस्तीकृता। दिल्ल्या: मुख्यमन्त्रिण: अरविन्दकेजरीवालस्य साम्प्रतिकसमयस्य मुक्तयाचिकाम् अवलोक्य श्रीसोरेनेन स्वकीयाय झारखण्ड-मुक्ति-मोर्चा दलाय प्रचाराय अल्पावधियाचिका अभ्यर्थिता। न्यायमूर्तिन संजीवखन्ना इत्येतस्य न्यायमूर्तिन: दीपांकर-दत्ता इत्येतस्य च एकेन पीठेन सोरेनस्य प्रदत्त याचिका श्राविता। अग्रिमं वादश्रवणं मासस्यास्य सप्तदशदिनांके निर्धारितमस्ति। अवधेयं वर्तते यत् झारखण्ड-मुक्ति-मोर्चादलनेता अयं जनवरीमासस्य एकत्रिंशदिनांके निगडित: सम्प्रति असौ रांचीनगरस्य बिरसा-मुण्डा-केन्द्रीयकारागृहे बन्धितो वर्तते।

## केन्द्रियमाध्यमिकशिक्षामण्डल-परिणाम:

केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन सी.बी.एस.ई. इत्यनेनाद्य दश-द्वादश-कक्षयो: परिणामा: घोषिता। अनेन संसूचितं यत् द्वादशकक्षायां सप्ताशीति दशमलव नवाष्ट प्रतिशतं छात्रा: उत्तीर्णा:। यत् विगतवर्षापेक्षया शून्यदशमलव षड्पञ्च प्रतिशतम् अधिकं वर्तते। अस्य वर्षस्य सञ्जातपरीक्षायां चतुर्विंशतिसहस्राधिकं छात्रै: पञ्चनवति: प्रतिशतं अङ्का: समर्जिता तत्रैव सपादलक्षाधिकं छात्रै: नवतिप्रतिशतं अङ्का: अधिगता:। छात्रा: www.cbseresults.nic.in इत्यत्र उतवा www.cbse.gov.in इत्यत्रापि स्वीयपरिणामान् अवलोकयितुं शक्नुवन्ति।

प्रधानमन्त्री नरेन्द्रमोदी सी.बी.एस.ई; इति द्वादश-कक्षाया: परिक्षायां उत्तीर्ण-छात्राणां अभिनन्दनं कृतवान्। एकेन सामाजिक-अर्न्तजाल माध्यमेन श्री मोदी उक्तवान् यत् स: छात्राणाम् उपलब्ध्या तेषां नैरन्तर्येण विहित प्रयासै: अत्यन्तं गर्वित: अस्ति इति। श्रीमोदी छत्राणां समर्थक-स्वजनानां, समर्पितानां शिक्षकानां च प्रयत्नानां अपि स्वीकृतवान् येषां समर्थनं अस्या: सफलाया कृते महत्त्वपूर्णं जातम्।

## हिमाचलप्रदेश-नामांकनम्

सूचनाप्रसारणमन्त्री भाजपेतिदलनेता अनुरागसिंहठाकुर: अद्य हिमाचलप्रदेशस्य हमीरपुर-संसदीय-क्षेत्रात् स्वीय-नामांकनपत्रं पूरितवान्। तेन सह वरिष्ठ: भाजपानेता पूर्वमुख्यमन्त्री च प्रोफेसर-प्रेमकुमारधूमल: आसीत्। श्रीठाकुर: अस्मात् संसदीय-क्षेत्रात् नैरन्तर्येण चतुर्वारं निर्वाचनं विजितवान् पञ्चवारमपि अस्मै क्षेत्राय स्पर्धिष्यति। तत्रैव शिमला-संसदीय-क्षेत्रात् भाजपाप्रत्याशी वर्तमानसांसद: सुरेशकश्यप: अपि अद्य स्वकीय-नामाङ्कनपत्रं भरितवान्। अस्मादेव आसनात् कांग्रेसदलप्रत्याशी विनोदसुल्तानपुरी अपि निजपत्रं पूरितवान्।

## भारतर्तुविज्ञानविभाग:

भारतर्तु-विज्ञान-विभागेन अग्रिमेषु चतुर्षु दिवसेषु उत्तर-पश्चिमीयमध्यभारते तापवृद्धि: अनुमानिता। राजस्थानराज्यं समेत्य एतेषु क्षेत्रेषु अस्य मासस्य षोडशदिनाङ्कात् उष्णलहरी सम्भाविता। ऋतु-विभागस्य वरिष्ठवैज्ञानिक: आर.के.जेनामणि: संसूचितवान् यत् येषु क्षेत्रेषु अद्य मतदानं प्रचलति तत्र उष्णप्रकोप: नैव विद्यते। आन्ध्रप्रदेश-तेलंगाना-महाराष्ट्र-मध्यप्रदेश-बिहार-झारखण्ड-दक्षिणओडिशा राज्येषु सामान्यं तापं अवलोकितम्।

## प्रधानमन्त्री-साक्षात्कार:

प्रधानमन्त्री वरिष्ठभाजपानेता च नरेन्द्र-मोदी कांग्रेसदलस्य आलोचनां कृत्वा प्रत्यपादयत् यत् कांग्रेसदलेन कदापि विकासाय प्राथमिकता न प्रदत्ता अपितु मतसंरक्षणाय तुष्टिकरणे एव केन्द्रीभूतमस्ति। श्रीमोदी प्रोक्तवान् यत् भाजपादलस्य विकास प्रधान-शासनस्य परिणाम: अयमस्ति यत् पूर्वमेव यानि राज्यानि रूग्णानि इत्युच्चन्ते। तानि राज्यानि अद्य पल्लवितानि पुष्पितानि जातानि। एकस्मिन् वार्ता श्री मोदीना प्रोक्तवान् यत् भाजपासर्वकार: एतादृशा: योजना: निर्मितवान् याभि: लक्षाधिका: जना: लाभं लब्धवन्त:। निर्धनेभ्य गृहाणि प्रदत्तानि महिला: शक्ता: जाता: यून: अवसरा: प्राप्तवन्त: च। श्रीमोदी आई.एन.डी.आई. संयुतिदलस्यापि आलोचनां कृतवान्।

## सोनोवाल-ईरानदेश:

केन्द्रीय-जलपोत-जलमार्ग-मन्त्री सर्बानन्द सोनावाल: अद्य ईरानदेशाय प्रस्थित:। सूत्रानुसारि मन्त्री भारत-ईरान-देशयोर्मध्ये महत्वपूर्ण-चांबहार-जलपोलस्थानक-सहभागित्वपत्रे एकस्मिन् हस्ताक्षरं कृतवान्। एतत् सहभागित्व पत्रं पाकिस्तानस्य कराचीस्थितं ग्वादर-जलपोत-स्थानकं वारयित्वा ईरानदेशस्य माध्यमेन दक्षिणमध्य-एशिययो: मध्ये नव-व्यापारमार्गस्य द्वाराणि उद्घाटयिष्यति। श्रीसोनोवालस्य यात्रेयं लोकसभानिर्वाचनावधौ चाबहार-जलपोत स्थानकाय प्रदत्तमहत्वे बलं प्रददाति।

आई.पी.एल्.

इण्डियनप्रीमियरलीग-इत्येतस्यां क्रिकेट-प्रतिस्पर्धायां समायोक्ष्यमाणे अद्यात्मके द्वन्द्वे अहमदाबादनगरस्य नरेन्द्रमोदी-क्रीडांगणे गुजरात-टाइटन्स-कोलकाता-नाइट-राइडर्स दले स्पर्धिष्येते। यस्या सजीवप्रसारणं रात्रौ सार्धसप्त-वादनतो समारप्स्यते। विगतरात्रौ जाते द्वन्द्वे बेंगलुरूनगरस्य एम्.चिन्नास्वामि-क्रीडांगणे रॉयल-चैलेन्जर्स-बेंगलुरूदलं डेल्ही-कैपिटल्सदलं सप्तचत्वारिंशत् धावनांकै: पराजितवत्।

।। इति वार्ता: ।।